राज्यं सुखञ्च दिव्याङ्गाः कन्यकायाः पति-
र्भवेत् ॥’

इति वासुदकम् ॥

शिवस्य लिङ्गरूपस्य तन्निर्माल्याग्राह्यत्वस्य च कारणं यथा,—

दिलीप उवाच ।

“वेद्मि त्वाहं द्विजश्रेष्ठ ! रुद्रस्त्रिपुरहन्तकः ।
कस्माद्विगर्हितं रूपं प्राप्तवान् सह भार्य्यया ॥
योनिलिङ्गस्वरूपश्च कथं स्यात् सुमहात्मनः ।
पञ्चवक्त्रश्चतुर्बाहुः शूलपाणिस्त्रिलोचनः ॥
कथं विगर्हितं रूपं प्राप्तवान् द्विजपुङ्गव ! ।
एवं सर्व्वं समाचक्ष्व मित्रावरुणनन्दन ॥

श्रीवशिष्ठ उवाच ।

शृणु राजन् प्रवक्ष्यामि यन्मां पृच्छसि गौरवात् ।
स्वायम्भुवो मनुः पूर्व्वं मन्दरे पर्व्वतोत्तमे ॥
इयाज मुनिभिः सार्द्धं दीर्घसत्रमनुत्तमम् ।
तस्मिन् समागताः सर्व्वे मुनयः शंसितव्रताः ॥
अन्वेष्टुं देवतातत्त्वं मिथः प्रोचुस्तपोधनाः ।
विप्राणां वेदविदुषां कः पूज्यो देवतावरः ॥
इति तस्य वचः श्रुत्वा सर्व्व एव महर्षयः ।
भृगुं तपोनिधिं विप्रं प्रोचुः प्राञ्जलयस्तदा ॥

ऋषय ऊचुः ।

अस्माकं संशयं छेत्तुं समर्थोऽसि शुभव्रत ।
ब्रह्मविष्णुमहेशानामन्तिकं व्रज सुव्रत ॥
गत्वा तेषां समीपन्तु तथा दृष्ट्वा च विग्रहान् ।
शुद्धसत्त्वगुणस्तेषां यस्मिन् संविद्यते मुने ! ॥
स एव पूज्यो विप्राणां नेतरस्तु कदाचन ।
तस्मात् त्वं हि मुनिश्रेष्ठ विबुधानां निरासनम् ॥
क्षिप्रं कुरु मुनिश्रेष्ठ सर्व्वलोकहितं प्रभो ॥
एवमुक्तस्ततस्तूर्णं कैलासं मुनिसत्तमः ।
जगाम वामदेवेन यत्रास्ते वृषभध्वजः ॥
गृहद्वारमुपागम्य शङ्करस्य महात्मनः ।
शूलहस्तं महारौद्रं नन्दिं दृष्ट्वाब्रवीद्द्विजः ॥
संप्राप्तो हि भृगुर्विप्रो हरं द्रष्टुं सुरोत्तमम् ।
निवेदयस्व मां शीघ्रं शङ्कराय महात्मने ॥
तस्य तद्वचनं श्रुत्वा नन्दी सर्व्वगणेश्वरः ।
उवाच परुषं वाक्यं महर्षिममितौजसम् ॥
असान्निध्यः प्रभोस्तस्य देव्या क्रीड़ति शङ्करः ।
निवर्त्तस्व निवर्त्तस्व यदि जीवितुमिच्छसि ॥
एवं निराकृतस्तेन तत्रातिष्ठन्महातपाः ।
बहूनि दिवसान्यस्मिन् गृहद्वारे मुनीश्वरः ॥
ततः क्रोधसमाविष्टो भृगुः प्रोवाच शङ्करम् ।
विनष्टस्तमसारूढ़ो मां न जानाति शङ्करः ॥
नारीसङ्गममत्तोऽसौ यस्मान्मामवमन्यते ।
योनिलिङ्गस्वरूपं वै रूपं तस्माद्भविष्यति ॥
ब्राह्मणं मां न जानाति तमसा चाप्युपागतः ।
अब्रह्मण्यत्वमापन्नो न पूज्योऽसौ द्विजन्मनाम् ॥
तस्मान्न जलमन्नन्तु तस्मै दत्तं हविस्तथा ।
शिवस्यान्नं जलञ्चैव पत्रं पुष्पं फलादिकम् ॥
निर्म्माल्यमस्य चाग्राह्यं भविष्यति न संशयः ॥
एवं शप्त्वा महातेजाः शङ्करं लोकपूजितम् ।
उवाच गणमत्युग्रं नन्दिं शूलधरं नृप ! ॥
रुद्रभक्ताश्च ये लोके भस्मलिङ्गास्थिधारिणः ।
ते पाषण्डत्वमापन्ना वेदवाह्या भवन्ति वै ॥
एवं शप्त्वा मुनिस्तत्र रुद्रं त्रिपुरहन्तकम् ।
जगाम ब्रह्मलोकं वै सर्व्वलोकनमस्कृतम् ॥”

इति पाद्मोत्तरखण्डीयाष्टसप्ततितमाध्यायात् सङ्कलितम् ॥*॥ शिवलिङ्गस्य पूजाधारत्वं यथा,

“पूजास्थानानि वक्ष्यामि यस्मिन् सान्निध्यतां
व्रजेत् ।
लिङ्गस्थां पूजयेद्देवीं स्थण्डिलस्थां तथैव च ।’
पुस्तकस्थां महादेवीं पादुके प्रतिमासु च ॥
तल्लिङ्गमाश्रयेन्मन्त्री मुक्तार्द्धैर्यैत् प्रतिष्ठितम् ।
कचार्द्धैर्यैत् कृतं लिङ्गं वर्ज्जनीयन्तु साधकैः ॥
अल्पसौख्यप्रदं प्रोक्तं वेदमन्त्रैः प्रतिष्ठितम् ।
साविकारन्तु यल्लिङ्गं भुक्तभोगं तथैव च ।
ज्ञातव्यं साधकेन्द्रैश्च सिद्धिदञ्चाप्यसिद्धिदम् ॥

देव्युवाच ।

साविकारन्तु यल्लिङ्गं मन्त्रहीनं प्रतिष्ठितम् ।
निर्वर्त्तितविकारञ्च अस्वयम्भु स्वयम्भवम् ॥
कुर्व्वन्ति भक्तिवात्सल्यं लोकानां वासनात्मकम् ।
दुर्विज्ञेयमिदं ज्ञानं योगिनामप्यगोचरम् ॥
मर्त्यैर्जड़धियैर्नाथ कथं विज्ञायते विभो ॥

ईश्वर उवाच ।

साधु साधु महादेवि ! रहस्यमिदमुत्तमम् ।
यत्त्वया चोदितं भद्रे ! तत्तथैव न चान्यथा ॥
दुर्विज्ञेयं सुरैश्चापि किं पुनर्मनुजन्तुभिः ।
व्याधिष्ठा साधकः चैनं हृदयानन्दकारकम् ॥
इन्द्रियाणाञ्च औत्सुक्यं ददामि लिङ्गदर्शने ।
सेव्यमानं ततो लिङ्गं नित्यमानन्ददायकम् ॥
सुस्वप्नान् पश्यति नित्यं विमानस्थां वराङ्गनाम् ।
भैरवं पश्यति नित्यं क्रीड़न्तं मातृमण्डले ॥
उमामहेश्वरञ्चापि स्वप्ने पश्यति साधकः ।
अनिवर्त्तिताधिकारं लिङ्गं त्रिभुवनेश्वरि ! ।
आक्रमन्ति महाविघ्नाः सदैत्या राक्षसादयः ॥
शून्यागारं यथा देवि ! आक्रमन्ति नराः प्रिये ।
अनर्च्चितन्तु भुञ्जन्ति तथा लिङ्गन्तु कल्पना ॥
प्रेतं यथा सुराध्यक्षे आक्रमन्ति पिशाचकाः ।
शून्यञ्च व्यङ्गलिङ्गन्तु आश्रयन्ति तथा प्रिये ॥”

इत्याद्ये देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥*॥

अथ लिङ्गलक्षणम् :

तत्र बाणलिङ्गस्य लक्षणं यथा,—

“बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शेषतः शृणु ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि यन्मुखे ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि
च ॥”

अथाग्नेयलिङ्गलक्षणम् ।

“आरक्तं हिव्यकीलालसुधास्पर्शं-करोज्ज्वलम् ।
आग्नेयं तत् शक्तिनिभमथवा शक्तिलाञ्छितम् ॥
इदं लिङ्गवरं स्थाप्य तेजसाधिपतिर्भवेत् ॥” *॥

अथ याम्यलिङ्गलक्षणम् ।

“दण्डाकारं भवेद्याम्यमथवा रसनाकृति ।
यद्यदुक्तं सह तेन निनिक्तं ज्ञायते तदा ।
निषिक्तं निधनं तेन क्रियते स्थापितेन तु ॥”*॥

अथ नैरृतलिङ्गलक्षणम् ।

“राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
कर्कशादिप्रलिप्तन्तु कुण्ठकुक्षियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थ्ये न सुखप्रदम् ॥”

अथ वारुणलिङ्गलक्षणम् ।

“वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्च्चसम् ।
इष्टिमुंखादेः कृत्स्नं संभोगाप्तन्तु मध्यगे ॥”

अथ वायुलिङ्गलक्षणम् ।

“कृष्णं धूम्रं न वारुण्यं ध्वजाभं ध्वजमूषलम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥”*॥

अथ कुवेरलिङ्गलक्षणम् ।

“तूणपाशगदाकारं गुह्यकेशस्य मध्यगम् ।”

अथ रौद्रलिङ्गलक्षणम् ।

“दिनं वाप्यथवा रात्रिं सशोणं रविवर्च्चसम् ।
अस्थिशूलाङ्कितं रौद्रं हेमकुण्डलवर्च्चसम् ॥”

अथ वैष्णवलिङ्गलक्षणम् :

“चतुर्व्वर्णमयं वापि वैष्णवं ज्ञायतेऽग्रतः ।
वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम् ॥
श्रीवत्सं कौस्तुभाङ्कञ्च सर्व्वसिंहासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ।
शालग्रामादिसंस्थन्तु शशाङ्कं श्रीविवर्द्धनम् ॥
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥”

इति वीरमित्रोदयधृतकालोत्तरः ॥ * ॥

नारद उवाच ।

“अथ वक्ष्यामि ते विप्र चिह्नमेकादशं परम् ।
श्रवणाद्यस्य पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं कृष्णकुण्डलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटाशूलसमन्वितम् ।
मृत्युञ्जयाख्यं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं कृष्णविन्दुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रणोदनम् ॥
ज्वलल्लिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ॥
प्रलयास्त्रसमायुक्तं त्रिपुरारिसमाह्वयम् ।
शुभ्राभं पिङ्गलजटं मुण्डमालाधरं परम् ॥
त्रिशैलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ।
त्रिशूलडमरुधरं शुभ्ररक्तार्द्धभागतः ॥
अर्द्धनारीश्वराक्रान्तं सर्व्वदेवैरभिष्टुतम् ।
ईषद्रक्तमयं कान्तं स्थूलं लिङ्गं समुज्ज्वलम् ॥
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ।
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महेशितुः ।